Purva Mimaansa | Refereed | Peer Reviewed
ISSN: 0976-0237 | Volume 12, Issue September 2021 | Impact Factor 4.765

FIRM IN FAITH & LARGE IN HEART
S.D. COLLEGE AMBALA CANTT
ESTD. 1916

# भारतस्यातुलनीया संस्कृतिः

**B. KESHAVAPRAPANNA PANDEY**
Assistant Professor, Dept of Sanskrit
Dwaraka Doss Goverdhan Doss Vaishnav College, Arumbakkam (Chennai)

## शोधसार:

"भारतस्य प्रतिष्ठे द्वे संस्कृतं संस्कृतिस्तथा" इत्यादिभिराभारतम् भारतीयसंस्कृतेः गौरवं कियदप्रतिमवैभवयुतमिति ज्ञायते, वाचामगोचरश्च यथार्थतः तज्ज्ञातुं सविस्तरम् । तथापि यावच्छक्यमनुभूयतेऽस्मिन् लेखे । तत्स्वरूपञ्च विवेच्यते सारत्वेन इह । तत्र संस्कृतिर्नाम चेतसः संस्करणं परिष्करणं वा इत्यभिधीयते । तादृशी चेयं संस्कृतिः दुःखद्वन्द्वानि संदह्य ज्ञानदीपं प्रकाशयति अन्तःकरणेषु , अज्ञानान्धतमो दूरीकरोति, भूतिं भावयति, सत्यं धारयति, शान्तिं समाधत्ते च नितरां । स्वक्षेममिच्छद्भिः सर्वैरपि मनुष्यैः करणत्रयेणापि नितरां समाराधयितव्या इयं सस्कृतिः, न च शक्या केनापि हातुमुपेक्षितुं वा । विविधाचारविचारवादव्याकुलेऽस्मिन् विश्वेऽद्यत्वे सैव संस्कृतिरुपादेयतामाप्स्यति या समेषां स्वान्तेषु सद्भावपुरःसरं विश्वहितं विश्वबन्धुत्वञ्चादर्शत्वेनोररीकुरुते। अतः नितरां सिध्यति यत् तापत्रयसन्तप्तं जगदिदं तापापनयनेन सुखनिधानं सम्पादयितुं विश्वजनीना इयं भारतीयसंस्कृतिरेव समर्थेत्यत्र नास्ति संशीतिर्लेशतोऽपि। तादृश्याः गौरान्वितायाः भारतीयसंस्कृत्याः विशिष्टाः केचनादर्शभूताः उपयोगिनश्च मुख्यांशाः विशेषतोऽस्मिन् लेखे क्रमेण प्रस्तुतास्सन्तिः । 1 . धर्मप्राधान्यं, 2 . आध्यामिकी भावना, 3.सदाचारपालनम्, 4.वर्णव्यवस्था, 5.अहिंसापालनम्, 6.त्यागमहत्त्वम्, 7.आश्रमव्यवस्था, 8.कर्मवादः, 9.पञ्चविधो यज्ञः, 10.सत्यपालनम्, 11.तपोमयजीवनम्, 12.मातृपितृगुरुभक्तिः, 13.परमपुरुषार्थश्चेत्येते भारतीयसंस्कृत्याः मुख्याङ्गभूता विषया अस्मच्छास्त्राण्याधारीकृत्य सप्रमाणं प्रोक्ताः, येषामनुष्ठानेन ज्ञानेन वात्मोन्नतिर्निश्चितेत्यत्र नैव संशयः ।

**प्रस्तावना**

तत्र संस्कृतेतिहासपुराणिदिषु भारतीयसंस्कृतेः विस्तृतविचारावसरे बहवो विषयाः समापतन्त्यस्माकं चेतसि । यद्यपि सिन्धुरिवागाधविषयैषा संस्कृतिरशक्या तत्त्वतो विवेचयितुं, तथापि यावच्छक्यं समासतोऽत्रोपस्थाप्यते। प्रथमन्तावत् का नाम संस्कृतिः? कथमिवोपकरोतीयं जनान् आत्मनः मनांसि राष्ट्रञ्च ? को वाधार अस्या अतुलनीयाया भारतीयसंस्कृतेः? किमिव हि श्रेयाञ्चानया संस्कृत्या इह ? कानि च कारणान्यस्या महद्गौरवस्य ? का वोपयोगिता चैतस्याः विश्वसंस्कृतौ ? किञ्च वैशिष्ट्यमस्मच्छास्त्रेष्वस्या इति ।

**भारतीय संस्कृतिवैशिष्टयम्**

साम्प्रतं संस्कृतेरस्याः वैशिष्ट्यमुपयोगिताञ्च किञ्चिदवलोकयामः । तत्र संस्कृतिर्नाम

PURVA MIMAANSA

आत्मनश्चेतसः संस्करणं परिष्करणं वा इत्यभिधीयते। तादृशी चेयं संस्कृतिः व्यपनयति मलं मनसः, चाञ्चल्यं मनसः, अज्ञानमात्मनश्चास्माकम् । पापापनयनानुपूर्वकं आनन्दयति स्वान्तं, दुर्भावदमनपूर्वकं संस्थापयति च धैर्यं मनस्सु जनानाम् । मनःशुद्धिपुरःसरं पावयत्यात्मानम् । अपहरति च चित्तभ्रमम्। दुःखद्वन्द्वानि संदह्य ज्ञानदीपं प्रकाशयति अन्तःकरणेषु , अज्ञानान्धतमो दूरीकरोति, भूतिं भावयति, सत्यं धारयति, शान्तिं समाधत्ते च नितरां। स्वक्षेममिच्छद्भिः सर्वैरपि मनुष्यैः करणत्रयेणापि नितरां समाराधयितव्या इयं सस्कृतिः, न शक्या च केनाप्येषा हातुमुपेक्षितुं वा। विविधाचारविचारवादव्याकुलेऽस्मिन् विश्वेऽद्यत्वे सैव संस्कृतिरुपादेयतामाप्स्यति या समेषां स्वान्तेषु सद्भावपुरःसरं विश्वहितं विश्वबन्धुत्वञ्चादर्शत्वेनोररीकुरुते। अतः नितरां सिध्यति यत् तापत्रयसन्तप्तं जगदिदं तापापनयनेन सुखनिधानं सम्पादयितुं विश्वजनीना इयं भारतीयसंस्कृतिरेव समर्थेत्यत्र नास्ति संशीतिर्लेशतोऽपि । तादृश्याः गौरान्वितायाः भारतीयसंस्कृत्याः विशिष्टाः केचनादर्शभूताः उपयोगिनश्च मुख्यांशाः विशेषतोऽत्र क्रमेण प्रस्तूयन्त इह । धर्मप्राधान्यं, आध्यामिकी भावना, सदाचारपालनम्, वर्णव्यवस्था, अहिंसापालनम्, त्यागमहत्त्वम्, आश्रमव्यवस्था, कर्मवादः, पञ्चविधो यज्ञः, सत्यपालनम्, तपोमयजीवनम्, मातृपितृगुरुभक्तिः, परमपुरुषार्थश्चेत्यनेके प्रोक्ताः।

**संस्कृतेर्विविध प्रकाराः**

इदानीं क्रमप्राप्तानामेकैकेषामपि धर्माधारभूतधर्मादीनां वैलक्षण्यमुपस्थाप्यते। प्रथमं संस्कृतेर्मुख्याधारभूतं धर्मप्राधान्यम् यथा – धर्मप्राधान्यादेव मानवाः सर्वमपि प्राणिजातमतिशेरते। अत एवोक्तं "धर्मो हि तेषामधिको विशेषो धर्मेण हीनाः पशुभिस्समानाः"।[1] नह्यत्र धर्मपदेन कश्चन संप्रदाय विशेषो विवक्षितः । तत्र जगद्धारकानि मूलत्त्वानि यानि शास्त्रेषु व्याख्यातानि तान्येव धर्मपदवाच्यानि। तदेवोच्यते -

धारणाद्धर्म इत्याहुः धर्मो धारयते प्रजाः।
यः स्याद् धारणसंयुक्तः स धर्म इति निश्चयः॥[2]

कणादेनापि यतोऽभ्युदयनिश्रेयससिद्धिः स धर्म इत्युक्तम् । अर्थात् यस्माद्धर्मात् ऐहिकी लौकिकी भौतिकी वा समुन्नतिः परमपुरुषार्थो नाम मोक्षाधिगमश्च निश्चीयते स धर्म इत्यत्र विवक्षा। स एव धर्मपदवाच्य इति।

इदानीम् आध्यात्मिकी भावना - जीवनमेतन्न केवलं भोगार्थमपित्वात्मोन्नतेरेकं मुख्यं साधनं भवतीत्यनया ज्ञायते। आध्यामिक्यया भावनया सामान्योऽपि मानवो देवत्वं प्राप्य सर्वेष्वपि जीवेष्वेकत्वं समीक्षते। उक्तञ्च ईशोपनिषदि-

"सर्वभूतेषु चात्मानं ततो न विजिगुप्सते "[3] इति।

तत्र आध्यात्मप्रवृत्त्या सौशील्य-वात्सल्य-मार्दव-आर्जव-कारुण्य-माधुर्य-गाम्भीर्य-चातुर्य-

स्थैर्य-धैर्य-शौर्य-औदार्यादिक्षेमङ्कराः गुणाः प्रवर्तन्ते साधकानां मनसि। एतादृशैः गुणैरलङ्कृतः कश्चन मनुष्यः न कंश्चिज्जुगुप्सते नाम । सर्वमपि प्राणिजातं समानया भावनया भावयंस्तेषु भगवन्तमेव निरीक्षते नाम।

**सदाचारपालनम् -** तत्र संस्कृतसाहित्यसंस्कृतौ सदाचारस्यानुसरणं तन्महत्त्वञ्च न केवलं भारते अपि च विदेशेपि अद्यत्वे दरीदृश्यते 'आचारः परमो धर्मः' इति सिद्धान्तमाश्रित्य सदाचारः सर्वोत्तमः तप इति स पालनीयः। उक्तञ्च महाभारते -

वृत्तं यत्नेन संरक्षेत् वित्तमेति च याति च।
अक्षीणो वित्ततो क्षीणः वृत्ततस्तु हतो हतः ॥[4]

ब्रह्मचर्यपालने इन्द्रियनिग्रहः मनसो दमश्च साधनीयौ। सदाचारपालने ब्रह्मचर्यस्य विशिष्टं स्थानं वर्तते अतः ब्रह्मचर्यव्रतस्याश्रयणेन न केवलं शारीरिकी समुन्नतिरवाप्यते अपि तु मानसिकी बौद्धिकी आध्यात्मिकसमुन्नतिश्चापि नितरां सुलभा । एवं चरित्ररक्षा, शीलरक्षा, संयमः, दमः मनसो वशीकरणम्, इन्द्रियाणां नियमनञ्चेत्यादिगुणाः विशेषतोऽवधेया इह सदाचारानुष्ठाने।

**वर्णव्यवस्था यथा-** भारतीयसंस्कृतेर्मुख्याधारभूतायामस्यां विशेषतः चत्वारो वर्णाः ब्राह्मणक्षत्रियवैश्यशूद्राश्चेति मुख्यं स्थानं वहन्ति । तत्र यजनं, याजनं, अध्ययनम्, अध्यापनम्, विद्यायाः धनस्य च दानं, परिग्रहश्च ब्राह्मणस्य मुख्यं कर्तव्यं भवति। उक्तञ्च मनुना -

शमो दमस्तपः शौचं क्षान्तिरार्जवमेव च।
ज्ञानविज्ञानमास्तिक्यं ब्रह्मकर्म स्वभावजम्।।[5]

इत्येतैः लक्षणैर्युक्तो कश्चन वास्त्विको ब्राह्मण इति कथितः। क्षत्रियाणाञ्च देशस्य समाजस्य रक्षणं परमो धर्म इति विहितः। क्षत्रियधर्ममनुपालयन् देशस्य जनतायाश्च मनोरञ्जनादप्येषो राजा इत्यपरेणाभिधानेनाहूयते नाम । यथा राजा प्रकृतिरञ्जनादिति । उक्ताश्च क्षत्रियगुणाः भगवद्गीतायामपि यथा –

शौर्यं तेजो धृतिर्दाक्ष्यं युद्धे चाप्यपलायनम्।
दानमीश्वरभावश्च क्षात्रं कर्म स्वभावजम् ॥[6] इति ॥

तदनन्तरं विशां वर्णव्यवस्थागतकर्तव्यानि प्रोक्तानि। कृषिः, सुरक्षा, वाणिज्यञ्च वैश्यस्य प्रमुखाणि कर्माणि भवन्ति। तल्लक्षणादिर्यथा –

विशत्याशु पशुभ्यश्च कृष्यादानरुचिः शुचिः।
वेदाध्ययनसम्पन्नः स वैश्य इति संज्ञितः॥[7]
"कृषिगौरक्ष्यवाणिज्यं वैश्यकर्मस्वभावजम्" ॥[8] इति

वैश्यानां कृषिक्षेत्रेषु सस्यादीनामुत्पादनम्, गवादीनां सम्यक्परिपालनम् अपि च मुख्यतया उत्पादितानां तेषां वस्तूनां विक्रयणादिद्वारा व्यापार इत्यादिकं मुख्यं कर्म प्रोक्तं येन च



PURVA MIMAANSA

लोकेऽस्मिन् नन्दितस्सन् परत्रापि महनीयतामाप्नोति।

अपि चान्तिमे श्रमसाध्यं शारीरिकं च कर्म शूद्रस्य प्रधानं कर्तव्यमुक्तम्। यथा -

"परिचर्यात्मकं कर्म शूद्रस्यापि स्वभावजम्" ॥[9] इति

**आश्रमव्यवस्था** - क्रमप्राप्तायामस्यामाश्रमव्यवस्थायां भारतीयसंस्कृतेः प्राणभूताश्चतुराश्रमाः ब्रह्मचर्य-गहस्थ-वानप्रस्थ-सन्यासा इति प्रोक्ताः। "निराश्रमी न तिष्ठेत्" इति शास्त्रवचनानुसारं स्ववयोऽनुरूपमेवाश्रममाश्रित्य तदाश्रमनिर्दिष्टनियमांश्च पालयेदिति नियमो दृश्यते शास्त्रेषु।

आपञ्चविंशतिवर्षं ब्रह्मचर्याश्रमः। तत्र विद्याध्ययनं, तपोमयजीवनं, सर्वविध गुणानां सङ्ग्रहश्चाश्रमेऽस्मिन् प्रधानम्। आपञ्चाषद्वर्ष गृहस्थाश्रमः यत्र भौतिकविषयाणामुपभोगः, वंशप्रतिष्ठायै सन्तानोत्पत्तिः, धर्मानुसारं दाम्पत्यजीवनयापनादिकं मुख्यं कर्म भवति। अपि च गृहस्थाश्रमः सर्वानामप्याश्रमाणामाधारभूत इत्युच्यते, आश्रमेनमाश्रित्यैवान्येषामाश्रमाणां संस्थितिरित्युच्यते स्वयं मनुमहर्षिणा मनुस्मृतौ यथा –

यथा वायुं समाश्रित्य वर्तन्ते सर्वजन्तवः।
तथा गृहस्थमाश्रित्य वर्तन्ते सर्व आश्रमाः॥[10]

तदनन्तरं वानप्रस्थाश्रमो भवति यत्र विशिष्टप्रवृत्तिश्च, धर्मपारायणता, इत्यादिकं विशिष्टं कर्म भवति। प्रवेशः। अस्मिंश्च आश्रमे सपत्नीकेन ईश्वराराधनं संयमपालनं योगादिकर्मसु प्रवृत्तिश्च मुख्यं कर्म भवति। चरमाश्रमे यदैव वैराग्यभावना समुत्पद्येत तदैव सन्यासाश्रमस्वीकार इति शास्त्रोपदेशः। एतस्मिंस्तु भौतिकविषयान्परित्यज्य योगाभ्यासे रतिः, पुण्यार्जनप्रवृत्तिः, समाधौ मनसः संस्थितिः, लोकविषये विरक्तिश्च परिव्राजकानां मुख्यं कृत्यं प्रोक्तम्।

**कर्मवादः**- सनातनसंकृतौ मुख्याङ्गभूतं कर्मवादं प्रति स्वयं गीताचार्यो वक्ति –

अवश्यमेव भोक्तव्यं कृतं कर्म शुभाशुभम्।
नाभुक्तं क्षीयते कर्म कल्पकोटिशतैरपि॥[11] इति

अपि च बृहदारण्यके- "पुण्यो वै पुण्येन कर्मणा भवति पापः पापेन एव"[12] इत्युक्तम् अर्थात् मानवः स्वकर्मानुसारं शुभं वाऽशुभं वा जन्म लभते। सुकृतानुरूपं सुफलं दुष्कृतानुरूपं कुफलञ्च प्राप्यते। अतस्तादृशं कर्म कार्यं येन जीवने दुःखावाप्तिर्न स्यात्।

इदानीं पञ्चविधयज्ञो यथा - पञ्चविधो यज्ञो निश्चयेन सनातनधर्मावलम्बिनां दैनिकजीवने मुख्याङ्गभूतो भवति। यज्ञस्त्वायं पञ्चधा विभक्तः। तत्र ब्रह्मयज्ञे सन्ध्योपासनमीश्वरपूजनञ्च मुख्यमनुष्ठानं भवति। दैववयज्ञे दैनिकयागस्यावश्यकर्तव्यता। पितृयज्ञे पित्रोः सततं परिचर्चा तयोराज्ञापालनञ्च। बलिदेवयज्ञे परिपक्वस्य भोजनस्याल्पेनांशेन मन्त्रपूर्वकमग्न्याहुतिः कीटादीभ्योऽन्नप्रदानञ्च। अतिथियज्ञे च "अतिथि देवो भव"[13] इति शास्त्रवचनमनुसृत्यातिथीनां

PURVA MIMANSA

शुश्रूषा सत्करणञ्चच। एतेषां दैनन्दिकजीवने परिपालनेनैव सर्वविधयज्ञफलप्राप्तिरिति निश्चप्रचम्।

इतःपरं भारतीयसंस्कृतिपरम्परायाः महद्गौरवस्याधारभूताः केचन मुख्यांशाः प्रस्तूयन्ते समासतोऽत्र। तत्र धर्मेष्वाद्यं सर्वस्याधारभूतं सत्यपरिपालनम् यथा - सत्यञ्च मनसा वाचा कर्मणा चोररीकुर्यात् तदनुसारमनुतिष्ठेच्च। सर्वदा सत्यं व्यवहरेन्नासत्यम्। सत्यमेव शाश्वतं विजयं लभते नासत्यम्। तथैवोक्तञ्च- "सत्यमेव जयते नानृतम्"[14] इति॥

**अहिंसापालनम्-** ''अहिंसा परमो धर्म'' इति। अहिंसैवास्माकं भारतीयसंस्कृतौ श्रेष्ठधर्मत्वेनाङ्गीक्रियते अनया अहिंसयैव विश्वशान्तिश्च साध्या। विश्वहितं जनहितं चेच्छताजस्रं करणत्रयेणापि अहिंसाधर्मः परिपालनीय इति शास्त्रादेशः महतामुपदेशश्च।

**त्यागमहत्त्वम्-** अनासक्तेनात्मना जगति व्यवहरेत्। न परस्वमभीप्सेत्। पुरुषार्थोपार्जितमेव भुञ्जीत। तथा च प्रोक्तं शास्त्रेषु –"तेन त्यक्तेन भुञ्जीयाः मा गृधः कस्य चिद्धनम्"[15] इति।

**तपोमयजीवनम् -** तपोमयजीवनस्य वैशिष्ट्यमस्माकं भारतेऽधिकम्। तपसैव शुद्ध्यति जीवनं मनश्च। सदा भोगविलासादिभिर्विषीदति स्वान्तम्। मनसो बुद्ध्याश्च परिष्काराय तपोमयजीवनं यापयेत्।

**मातृ- पितृ- गुरु- भक्तिः –** संकृतिरियं भारतदेशस्य आत्मा भवति। आर्षपरम्परायां वैशिष्ट्यञ्चाधिकम्। यथा – "मातृदेवो भव"[16]। "पितृदेवो भव"। "आचार्यदेवो भव" इत्येषां देववत्पूज्यत्वमुच्यते। एतेषां सेवयैव सकलमप्यत्र सिद्ध्यति। मातुः पितुः गुरूणाञ्च शुभचिन्तकानामादेशः सदा पालनीयः। तेषामाज्ञानुसारमेव वर्तितव्यञ्च।

**चरमे च परमपुरुषार्थो मोक्षश्च –** मोक्ष्यते आत्यन्तिकदुःखमनेन इति व्युत्पत्या तत्र मोक्षाख्यः पुरुषार्थ एव सर्वैरपीष्यते। मोक्षमधिगम्य न पुनरावर्तन्ते मुनयो मुक्ताश्च। देहावसानानन्तरं भगवच्चरणारविन्दाश्रितो मुक्तो विष्णुदूतैः स्तूयमानः तैस्सह दिव्यविमानारूढो भगवद्धाम प्रति दिव्यप्रयाणं मध्ये चानेकेषां दिव्यलोकानां दर्शनम्, अन्ते तद्धाम प्राप्य तत्सायुज्यं,सारूप्यं,सामीप्य च प्राप्नोतीति शास्त्रम्। यथा-

"मुक्तोर्चिर्दिनपूर्वपक्षषडुदङ्मासाब्दवातांशुमद्
ग्लौविद्युद्वरुणेन्द्रधातृमहितः सीमान्तसिन्ध्वाप्लुतः।
श्रीवैकुण्ठमुपेत्य नित्यमजडं तस्मिन्परब्रह्मणः
सायुज्यं समवाप्य नन्दति समं तेनैव धन्यं पुमान्"[17]।

**उपसंहारः**

अन्ते चागम्य नितरामिमां संस्कृतिं ततो ज्ञानाग्निना सर्वकर्मप्रदाहद्वारा भगवच्चरणारविन्दयोः आकिञ्चन्येन आत्मसमर्पणपूर्वकशरणागतिना च मोक्षावाप्तिरिति

शास्त्रसारः। एवं विश्वहितस्य विश्वोन्नतेश्च अस्यां भारतीयसंस्कृतौ भावनाः सर्वाः मूलभूताः सुतरामुपलभ्यन्ते । एतासामुपयोगेन, अपि च आश्रयणेनैव अद्यत्वे राष्ट्रस्य विश्वस्य च सर्वविधाः विषयाः सुलभा एव । संस्कृतेरस्याः उपयोगिता गुणवैशिष्ट्यञ्च सम्यक् समीक्ष्यैवाद्यत्वे समुन्नतिः विश्वसंस्कृतौ महती आदृतिरित्यत्र नैव संशयः।

सन्दर्भसूची

1. व्यासमहर्षिकृतमहाभारते शान्तिपर्वणि 264 तमे अध्याये 26तमश्लोकः,पृष्ठसंख्या- 893 प्रकाशक-गीताप्रेस प्र-संस्करणम् – 2015 गोरखपुर्
2. महाभारते शान्तिपर्वणि 109तमे अध्याये 12श्लोकः पृष्ठसंख्या-726 प्रकाशक-गीताप्रेस प्र-संस्करणम् – 2015 गोरखपुर्
3. ईशावास्योपनिषदि 6 श्लोकः, पृष्ठसंख्या-10
4. महाभारते उद्योगपर्वणि 36तमे अध्याये 30तमः श्लोकः, पृष्ठसंख्या-227, प्रकाशक-गीताप्रेस प्र-संस्करणम् – 2015 गोरखपुर्
5. श्रीरामानुजभाष्यकृतभगवद्गीतायां-18तमे अध्याये 42श्लोकः, पृष्ठसंख्या-176, अनुवादकः-श्रीहरिकृष्णदास गोयन्दका, प्रकाशक-गीताप्रेस,प्र-संस्करण-2004 गोरखपुर्
6. श्रीरामानुजभाष्यकृतभगवद्गीतायां-18तमे अध्याये 43तमश्लोकः, पृष्ठसंख्या-176, अनुवादकः-श्रीहरिकृष्णदास गोयन्दका, प्रकाशक-गीताप्रेस,प्र-संस्करण-2004 गोरखपुर्
7. नारदपुराणे (पूर्वार्धे) 43तमे अध्याये 68तमः श्लोकः, पृष्ठसंख्या-155 गीताप्रेस् गोरखपुर्, द्वि.संस्करणम्-2003
8. श्रीरामानुजभाष्यकृतभगवद्गीतायां-18तमे अध्याये 44तमश्लोकः, पृष्ठसंख्या-176, अनुवादकः-श्रीहरिकृष्णदास गोयन्दका, प्रकाशक-गीताप्रेस,प्र-संस्करण-2004 गोरखपुर्
9. श्रीरामानुजभाष्यकृतभगवद्गीतायां-18तमे अध्याये 44तमश्लोकः, पृष्ठसंख्या-176, अनुवादकः-श्रीहरिकृष्णदास गोयन्दका, प्रकाशक-गीताप्रेस,प्र-संस्करण-2004 गोरखपुर्
10. मनुस्मृतौ 3.77तमः श्लोकः, सम्पादक- टी आर् स्वामी प्रका- रञ्जनपब्लिकेशन्स , 2019 प्रथमावृत्तिः नई दिल्ली
11. ब्रह्मवैवर्तपुराणे प्रकृतिखण्डे 44तमे अध्याये 74तमश्लोकः, हिन्दीव्याख्यासमेतम् प्रकाशक-गीताप्रेस प्र.संस्करणम् 1st Jan 2017, ISBN-81930256X
12. साखरे किसनमहाराजकृत-दशोपनिषद्भावप्रकाशिकान्तर्गते बृहदारण्यके 2.13, यशोधन प्रकाशन, प्र-संस्करणम् आळन्दी 2008
13. साखरे किसनमहाराजकृत-दशोपनिषद्भावप्रकाशिकान्तर्गतायां तैत्तरीयोपनिषदि , यशोधन प्रकाशन, प्र-संस्करणम् आळन्दी 2008

PURVA MIMAANSA

14. किसनमहाराजकृत-दशोपनिषद्भावप्रकाशिकान्तर्गतायां मुण्डकोपनिषदि 3.1.6, यशोधन प्रकाशन, प्र-संस्करणम् आळन्दी 2008
15. ईशावास्योपनिषदि किसनमहाराजकृत-दशोपनिषद्भावप्रकाशिकान्तर्गतायां ईशावास्योपनिषदि , यशोधन प्रकाशन, प्र-संस्करणम् आळन्दी 2008
16. किसनमहाराजकृत-दशोपनिषद्भावप्रकाशिकान्तर्गतायां तैत्तरीयोपनिषदि , यशोधन प्रकाशन, प्र-संस्करणम् आळन्दी 2008
17. वात्स्यवरदाचार्यकृत-परमार्थश्लोकद्वयम् श्लोकसंख्या-1 प्रकाशकः- Jeeyar Educational Trust-1999

ग्रन्थसूची –

1. साखरे किसनमहाराजकृत-
दशोपनिषद्भावप्रकाशिका
यशोधन प्रकाशन, प्र-संस्करणम्
आळन्दी 2008
2. व्यासमहर्षिकृतमहाभारतम्
प्रकाशक-गीताप्रेस
प्र-संस्करणम् – 2015 गोरखपुर्
3. पद्मपुराणम् भागम्- 1,2
चौखम्भासंस्कृतसीरीज्कार्यालयः
प्र-संस्करणम् – 2015 वाराणसी
4. ब्रह्मवैवर्तपुराणम्
हिन्दीव्याख्यासमेतम्
प्रकाशक-गीताप्रेस
प्र-संस्करणम् 1st Jan 2017
ISBN-81930256X
5. श्रीरामानुजभाष्यकृत-भगवद्गीता
अनुवादकः-श्रीहरिकृष्णदास गोयन्दका
प्रकाशक-गीताप्रेस,प्र-संस्करण-2004गोरखपुर्

PURVA MIMAANSA